# Shrisankashtamochanastotram 2

# શ્રીસઙ્કષ્ટમોચનસ્તોત્રમ્ ૨

## Document Information

Text title : saMkaShTamochanastotram 2

File name : saMkaShTamochanastotram2.itx

Category : hanumaana, stotra, maheshvarAnandasarasvatI

Location : doc_hanumaana

Author : maheshvarAnandasarasvatI

Transliterated by : Processed by Sowmya Ramkumar

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : September 19, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# Shrisankashtamochanastotram 2

# શ્રીસઙ્કષ્ટમોચનસ્તોત્રમ્ ૨

કાશીપીઠાધીશ્વર જગદ્ગુરુશઙ્કરાચાર્યસ્વામિ
શ્રીમહેશ્વરાનન્દસરસ્વતીવિરચિતં સ્તોત્રમ્

સિન્દૂરપૂરરુચિરો બલવીર્યસિન્ધુઃ
    બુદ્ધિપ્રભાવનિધિરદ્ભુતવૈભવશ્રીઃ ।
દીનાર્તિદાવદહનો વરદો વરેણ્યઃ
    સઙ્કષ્ટમોચનવિભુસ્તનુતાં શુભં નઃ ॥ ૧॥

સોત્સાહલઙ્ઘિતમહાર્ણવપૌરુષશ્રીઃ
    લઙ્કાપુરીપ્રદહનપ્રથિતપ્રભાવઃ ।
ઘોરાહવપ્રમથિતારિચયપ્રવીરઃ
    પ્રાભઞ્જનિર્જયતિ મર્કટસાર્વભૌમઃ ॥ ૨॥

દ્રોણાચલાનયનવર્ણિતભવ્યભૂતિઃ
    શ્રીરામલક્ષ્મણસહાયકચક્રવર્તી ।
કાશીસ્થદક્ષિણવિરાજિતસૌધમલ્લઃ
    શ્રીમારુતિર્વિજયતે ભગવાન્ મહેશઃ ॥ ૩॥

નૂનં સ્મૃતોઽપિ દદતે ભજતાં કપીન્દ્રઃ
    સમ્પૂજિતો દિશતિ વાઞ્છિત-સિદ્ધિવૃદ્ધિમ્ ।
સંમોદકપ્રિય ઉપૈતિ પરં પ્રહર્ષં
    રામાયણશ્રવણતઃ પઠતાં શરણ્યઃ ॥ ૪॥

શ્રીભારતપ્રવરયુદ્ધરથોદ્ધતશ્રીઃ
    પાર્થૈકકેતનકરાલવિશાલમૂર્તિઃ ।
ઉચ્ચૈર્ઘનાઘનઘટાવિકટાટ્ટહાસઃ
    શ્રીકૃષ્ણપક્ષભરણઃ શરણં મમાઽસ્તુ ॥ ૫॥

જઙ્ઘાલજઙ્ઘ ઉપમાતિવિદૂરવેગો

મુષ્ટિપ્રહારપરિમૂર્ચ્છિતરાક્ષસેન્દ્રઃ ।
શ્રીરામકીર્તિતપરાક્રમણોદ્ભવશ્રીઃ
પ્રાકમ્પનિર્વિભુરુદઞ્ચતુ ભૂતયે નઃ ॥ ૬॥

સીતાર્તિદારણપટુઃ પ્રબલઃ પ્રતાપી
શ્રીરાઘવેન્દ્રપરિરમ્ભવરપ્રસાદઃ ।
વર્ણીશ્વરઃ સવિધિશિક્ષિતકાલનેમિઃ
પઞ્ચાનનોઽપનયતાં વિપદોઽધિદેશમ્ ॥ ૭॥

ઉદ્યદ્ભાનુસહસ્રસન્નિભતનુઃ પીતામ્બરાલઙ્કૃતઃ
પ્રોજ્જ્વાલાનલદીપ્યમાનનયનો નિષ્પિષ્ટરક્ષોગણઃ ।
સંવર્તોદ્યતવારિદોદ્ધતરવઃપ્રોચ્ચૈર્ગદાવિભ્રમઃ
શ્રીમાન્ મારુતનંદનઃ પ્રતિદિનં ધ્યેયો વિપદ્ભઞ્જનઃ ॥ ૮॥

રક્ષઃપિશાચભયનાશનમામયાધિ
પ્રોચ્ચૈર્જ્વરાપહરણં હનનં રિપૂણામ્ ।
સમ્પત્તિપુત્રકરણં વિજયપ્રદાનં
સઙ્કષ્ટમોચનવિભોઃ સ્તવનં નરાણામ્ ॥ ૯॥

દારિદ્ર્યદુઃખદહનં શમનં વિવાદે
કલ્યાણસાધનમમઙ્ગલવારણાય ।
દામ્પત્યદીર્ઘસુખસર્વમનોરથાપ્તિં
શ્રીમારુતેઃ સ્તવશતાવૃતિરાતનોતિ ॥ ૧૦॥

સ્તોત્રં ય એતદનુવાસરમાપ્તકામઃ
શ્રીમારુતિં સમનુચિન્ત્ય પઠેત્ સુધીરઃ ।
તસ્મૈ પ્રસાદસુમુખો વરવાનરેન્દ્રઃ
સાક્ષાત્કૃતો ભવતિ શાશ્વતિકઃ સહાયઃ ॥ ૧૧॥

સઙ્કષ્ટમોચનસ્તોત્રં શઙ્કરાચાર્યભિક્ષુણા ।
મહેશ્વરેણ રચિતં મારુતેશ્ચરણેઽર્પિતમ્ ॥ ૧૨॥

ઇતિ કાશીપીઠાધીશ્વર જગદ્ગુરુશઙ્કરાચાર્યસ્વામિ
શ્રીમહેશ્વરાનન્દસરસ્વતીવિરચિતં શ્રીસઙ્કષ્ટમોચનસ્તોત્રં સમ્પૂર્ણમ્ ।

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*Shrisankashtamochanastotram 2*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*